वि० टी०
६३

अथ सर्वासां रेखाणां साधारणं गुणमाह अरक्तेति विपरीताख्यानिकी अरक्ताः स्निग्धा गंभी-
रा निम्ना मनोहराः सुदरा अन्तरे मध्ये मधुवत्पिंगलवर्णा भिन्नं चातिबहुभिरनतिसंकीर्णाः
भिस्ताभी रेखाभीः पुंस्त्रीफलयोः स्फुटत्वं शुभाशुभफलाधिक्यं स्यात् केषु अवामवामेषु पुं-
सो दक्षिणेषु हस्तचरणादिष्वंगेषु स्त्रियो वामेष्वित्यर्थः २४ अथ करे चरणे वा राजचिन्हानि

अरक्तागंभीरमनोहराभी रेखाभिरन्नमधुपिंगलाभिः नचातिबहुभिरवा
मवामेष्वंगेषु पुंस्त्रीफलयोः स्फुटत्वम् २४ सरोजश्रीवृक्षध्वजगजतिमिस्तं
भकलशास्रगादर्शछत्रांकुशकुलिशभृंगारगिरिभिः रथाश्वश्रीवत्सव्यज
नयवयूपप्रभृतिभिर्नरा नार्यो राज्यं दधति पदपाणिप्रणयिभिः ॥ २५

न्याह सरोजेति शिखरिणी सरोजं कमलं श्रीवृक्षो बिल्वः ध्वजः केतुः गजो हस्ती तिमिर्मत्स्यः
स्तंभकलशौ रव्यातौ स्रक् माला आदर्शो दर्पणं छत्रमातपत्रं अंकुशः सृणिः कुलिशं भृंगार
कः करकः गिरिः पर्वतः रथः स्यंदनं अश्वो हयः श्रीवत्सो विष्णुवक्षसि रोमावर्तो दक्षिणावर्त
तः तदुपचारात्प्रदक्षिणावर्तमात्रं गृह्यते व्यजनं तालवृंतं यवो धान्यविशेषः यूपो यज्ञस्तम्भः इति

वज्रं

६३

1357

कनिष्ठिकेति जीवितमायुः कनिष्ठिकायुरेखयोर्मध्ये करभप्रदेशे स्थिता मिथोऽन्योन्यं कांतकलत्ररेखा
ःस्युः पुंहस्ते तावन्नाप्तस्य भार्या स्त्रीहस्ते तावन्नाप्तस्य कांता इत्यर्थः मणिबंधादाकनिष्ठं करस्य कर
भो वहिः इत्यमरः परेऽवैरितेऽस्मिन् करभे स्थिताः सामानुरेखा वर्गस्यापत्यरीत्या रेखा ज्ञेयाः संमातृरेखा
त्यानि सामानुराः सोदराः मातृरूपस्य सम्भवपूर्वी याद्यत्यम् उरश्च यथुग्मेष तत्तपुत्राः कन्या
श्चतत्ति तास्तथा मायुश्च तद्वदस्मिन् जीवितरेखायाःऽधः स्थिते करभे ऽपानगोभगिन्यश्चेते वामायु

कनिष्ठिकाजीवितरेखयोः स्यान्मध्योमिथः कांतकलत्ररेखा अपत्यरीत्या करभे पदे
ऽस्मिन् भवंति सामानुरेखवर्गरेखाः २२ अनामिकामूलविभूषणं या पुण्यरेखा तत
दवाप्तिहेतुः निःसीमसीमंतिनपंचशाखा कस्तां दरेखा न करोति राज्यम् २२

श्चतत्पुण्यं युग्मितिभावः २२ अनामिकेति या रेखा नामिकामूलस्य विभूषणं मनामिकामूलेऊ
र्ध्वस्थितेत्यर्थः नित्यनपुंसकत्वात् स्त्रीविशेषणत्वेपि भूषणस्य क्लीबत्वम् सा पुण्यरेखा विद्यमाना
धेद्भेदहीनानत्स्य पुण्यस्यावाप्तिहेतुः हेतुशब्दस्य नित्यपुंस्त्वं निर्गतः सीमावधिर्यस्याः सो निःसीमः
सीमंतोजातोऽस्मिन् सो सीमंतिनः पंचशाखायस्यासौ पंचशाखः करः निःसीमसंपूर्णं सीमंतिं
नो द्विधाकृतः पंचशाखः पाणिर्येया सा दरेखा कस्य राज्यं न करोति अपि तु सर्वस्यापीति पंचशा

२३

वि०दी० आक्षिप्यमाण इति यो वा स्वभवनमध्ये गर्दभादीयानेऽधिकृत आरूढो दक्षिणदिश्याक्षिप्यमाणः प्रे
६० र्यमाणः प्रबुध्यते आर्याज्ञातारः कुमार्याः प्रदानाय न वृणीरन् तत्र कारणमाह नेदिष्टेति
नेदिष्टे निसमीपे दिष्टान्तः प्रलयो यस्मात्सो न तथा अंतिकबाढयोर्नेदसाधाविति नेदादेशः दिष्टां
तः प्रलयो मृत्युर्यस्य स मरः अर्थादेवंविधमासन्नमृत्युं कुमारीवरोपि न वृणुयात् ११ अथच्छा

आक्षिप्यमाणो दिशि दक्षिणस्यां जागर्ति यानेऽधिकृतः खराद्यैः नेदिष्टदिष्टां ॥
न ममुं कुमार्यो नार्याः प्रदानाय वरं वृणीरन् ११ छायां निरीक्ष्य क्षणमंतरिक्षं ।
पश्यन्न यो निश्चलनेत्रपातः अभ्राभ्रमस्थ्यमिह स्वकायं पश्येत्स न स्याद्विकृतो

यावत्क्षणेनारिष्टफल[illegible]माह छायामिति निश्चलः स्थिरो नेत्रयोः पातो यस्यासौ न तथा सन् क्ष
णमात्रं स्वछायां निरीक्ष्य ततः क्षणमंतरिक्षं पश्यन् स्वकीयं स्वदेहम[illegible]भ्राभ्राणि क्षितिनमेघान्तैः
समानाच्छायाकान्तिर्यस्यासौ तेन तयः पश्येत्स न श्रेपन्नयेन किं च इह स्वकाये विकृतौ दृष्टायां स्वस्तां
विकारः स्यात् यस्यांगस्य यथाविकारो दृष्टस्तस्य तथाविकारः स्यादित्यर्थः १२ ॥ दुर्गायै नमः ६०

यश्चत्वगादिहेतुं विनान्यलंभत्तयति यश्च नस्तकादिव्याधिं विनावक्रमूरिमत्तयति यश्च सदसन्त्रहत्ति विष
येनीन सान्यस्वरूपकः स्वभावः सत्त्र हत्ति स्वभावो सति प्रवर्त्तेनाम सन्त्रहत्तिः स्वभावश्च सततीति यश्चांगुलिभ्यां
क्रांतौ तिपीडितौ विलोचनांतौ नेत्रप्रांतौ येन सम्मेचकं मायूरपत्रनिभं चंद्रकं खद्योतायमानं स्वानुभ
वसिद्धं नेत्तते ८ मध्ये इति मध्येललाटमिति पारमध्ये षष्ठ्यावेत्यव्ययीभावः यःललाटस्य मध्ये मणि

अतीव तुच्छं च कुवान्यहेतोरतीव सान्यः सदसन्त्रहत्तौ अप्यङ्गुलिक्रांतविलोचनांतो नमेच
कं चंद्रकमीक्षते यः ८ मध्ये ललाटं मणिबंधधारी न वालिकां पश्यति यः कलावी अह
र्निकं यः श्रवणेऽधिगात्रः सर्वत्र सीमंतितमूर्द्धजो वा ९ अपि त्वरं हेमनखः शरीरात्स घः स्व
वक्षाम विलोचनो वा निरीक्षते सत्त्वममानुषं यः विस्मृत्य तां सानयनः श्रुतिर्वा १० ॥छ

बंधं धृत्वा लिकां कृशां कलावीन पश्यति तत्र हस्तापस्य संधिर्मणिबंधः तदधोहस्तभागः कलावी स्त्री
णां करभूषणस्थाने यश्चाहेतुकमकारणं श्रवस्यांगधःश्रवणेऽधो येषां तानि श्रवणाधीनि तानि चतानि गा
त्राणि यस्यासौ तथा पि वा सर्वत्र सीमंतितानि सीमंताः मूर्द्धजाः केशा यस्यासौ तथा सीमंतः स्त्रीणां ल
लाटादूर्द्धं केशवेशः प्रसिद्धः ९ अपीति यो वा शरीरात्त्वरितं गलन्ति तिरो माणिनरखानि यस्य सतथा
यो वा सघः स्वचक्षुर्विम्बचक्षामं विलोचने यस्य स तथा यो वा ऽमानुषं पिशाचादिकं सत्त्वं निरीक्षते

१०

136

वि॰टी॰
५९

1361

अथ प्रकृतं नक्षत्रावस्थास्फारितं श्लोकसप्तकेन छायामिति यस्य अंबरे न दृश्यते रविरस्तान्तरे सर्व
नक्षत्रसंबंधः अरुंधत्यः विधो छायां कलंकं नालोकयेत् ध्रुवं नक्षत्रमालां च मातृचक्रं च नारायमंडलाम
कं नालोकयेत् यस्य च पदं कर्दमे धूल्यादौ निहितं खंडं जायते यस्य च निष्कूतः कफः श्लेष्मा उदके च्यु
तो वुद्बुदी न जलं संगीमज्जन यो याति ५ उरः इति यस्य उरो वक्षःस्थलं चंदनादिनोलिप्तमपि तरां गात्रं सर्वमेव

छायां विधोर्न ध्रुवमत्र मालामालोकयेद्यो न च मातृचक्रं खंडं पदं यस्य च कर्दमादौ क
फश्च्युतो मज्जति वुद्बुदी वा ५ उरः पुरः शुष्यति यस्य चार्द्रं न मान्तितिस्नानं गलयश्च
वक्त्रे स्नातस्य मध्ये पिधूम वदन्नी निलीयते रिक्तमुखः खगो वा ६ नाकीर्णकर्णः श्रृणु
याच्च घोषं यो वा सुमुक्तोपि धृति न धत्ते निःश्रीरकस्मात्सुनरां च सुश्रीः कृशः स्ववीर्यात् ६९

शुष्कं भवति यस्य वक्षेकनिष्ठां गतो विहाय मध्यमा अस्तिस्नानं गलयः परस्य रक्तकेसंलग्ना न समा
विशंति मरिष्यतो हि मुखवृत्तं संकुचितं भवति यस्य वो दके स्नातस्य मस्तके धूमशिखास्यात् यस्य वा
मूर्ध्नि फलधान्यादिनारिक्तचंचुः काकश्येनादिनिवसति ६ नाकीर्णेति यश्च अंगुल्यादिना वृत्तकर्णं
धुः स्वाभाविकं घोषं न शृणुयात् यो वा सुमुक्तो पि धृतिं न याति यश्च सुश्रीरपि विनै वरोगादिना भयो

स्मान्वतिना ।

५९

एवमनेकेषु कल्पेष्वस्य समाधानमाह प्रागिति पूर्वजन्मनि यदुपार्जितं सदसत्कर्म तत्प्राक्कर्मेत्युच्यते त
द्दैवं यच्चैहिकं कर्म तत्प्रयत्नः पौरुषं चोच्यते प्राक्कर्मणः शोषाय पोषाय च इहैव विधीयमानं क
र्म समर्थं भवति किंवत् सलिलादिवत् जलाग्निभूमीसंस्कारवत् यथा बीजं संस्कारसंस्कृतं सदुदे
ति वर्द्धते वान्यथा नाशीयते तथा प्राक्तनं बीजमैहिकेन यत्नेन वर्द्धतेन्यथा नाशीयते तस्मात्सदाचारवतां
श्रुतिस्मृत्याद्युदिताचरणनिष्ठानां कदापि न हानिः अत एव कर्मफलं तेन प्रयत्नेन निवार्यते ततो
प्राक्कर्मबीजं सलिलानलोर्वीसंस्कारवत्कर्म विधीयमानं शोषाय पोषाय च तस्मात्तस्मा
त्सदाचारवतां न हानिः ३ फलेद्यदि प्राक्तनमेव तत्किं कुर्याद्युपायेषु परः प्रयत्नः
श्रुतिः स्मृतिश्चापि न लोके निषेधविध्यात्मके कर्मणि किं निबद्धा ४ ॥
निमित्तलक्षणं प्राक्तनादृष्टोपर्यवसायमन्वेष्याः ३ केचित्प्राक्कर्मैव फलदमिति मन्यन्ते तन्मतं निरस्य
ति फलेदिति विपरीतास्वामिनः प्रागभवं प्राक्तनं कर्मैव चेत्फले न यत्नः तदा यदवश्यंभावि तद्भ
वत्येवेत्याशया सर्वजनैः कृष्यादिषु न यतनीयम् यतते चातः प्रत्यक्षविरुद्धं तदित्यर्थः आगमविरो
धमप्याह श्रुतिरिति न लोके निषेधविधिरूपे कर्मणि श्रुतिः स्मृतिश्चापि किं निबद्धा आत्मानं सतत
ं रक्षेदित्यादि नष्टतमारोहेन्न कूपमवेक्षेत न बाहुभ्यां नदीं तरेन्न संशयमभ्यापद्येत नाभ्यासनायनके

तदेव प्रपंचयति स्वप्न इति एवं स्वप्नादिको विविधोनेकप्रकारः फलाध्वा फलागमकमार्गोस्ति तत्र स्वप्नं नि
शि जन्यं जाग्रद्वासनावासितमनःपरिणामपदार्थज्ञानं स मिथ्याभूतोपि शुभाशुभसूचकः निमित्तानि
च तद्दुर्वचनादीनि शकुनाः एणकुम्भादयः स्वकर्म निजप्राचीनकर्मविपाकः शारीरं सामुद्रिकल ॥
क्षणं आगंतुकं भविष्यत्सूचकं जातकादि अद्भुतानि दिव्यभौमांतरिक्षजाउत्पाताः दोषा वातपित्ताद
यः स्वाभाविकाद्देहस्यास्तेषामभिचारः स्वरविभंगादि ग्रहचारः ग्रहाणां वक्रमार्गोदयास्तादयः का

स्वप्नो निमित्तं शकुनाः स्वकर्म शरीरमागन्तुकमद्भुतानि दोषा
भिचारग्रहचारकालकाम्यानि चैवं विविधः फलाध्वा २

लः संवत्सरमासलग्नादि काम्यं कांक्षितं रोहिकं प्रश्नचेष्टितादि तथाह शौनकः तिथिकरणर्क्ष
निशाकरविलग्नपरिकल्पनामयं गर्गः पाणिग्रहणे शुभफलं वदन्ति यवना वसिष्ठश्च ग्रहराशिगो
चरफलं जातकविहितं च देवलः प्राह शकुनफलज्ञाः शकुनैर्निमित्तकुशला निमित्तैश्च कर्म स्वमस्य
मन्ये कुलदेशजातिस्वभावमपरे तु इत्यमन्यमनयः कालविशेषात्फलमिति यत एव फलाध्वा विवि
धोतो वरवध्वोः सामुद्रिकलक्षणस्वरादिशादिकमप्यस्माभिरुच्यत इति भावः तथोक्तं जातकनिर्मि
तन्त्रं शुभमलक्षणलक्षितां कुलोद्भूतां वरयेत्सु तनोर्व्याधिं यवीयसीं कन्यकामिशाम् यवीयसीव

अथ स्त्रीपुंसयोर्लक्षणज्ञानाय निबन्धाध्यायारंभः तत्र तत्कारणमाह उद्दिश्यैवेति वरः प्रथमं कुमा
र्याः समुद्रेण प्रणीतानि लक्षणानि उद्दिश्य स्फुटं ज्ञात्वा निमित्तैः शुभशकुनादिभिः शुभं ज्ञात्वा
कुमारीं वृणुयात् एवं कुमार्यपि वरस्य लक्षणानि सम्यक् शुभं निमित्तं च ज्ञात्वा वरं वृणुयात् एवं च

उद्दिश्य सामुद्रिकलक्षणानि वरः कुमारीं वृणुयान्निमित्तैः
एवं कुमारी वरमप्युदर्कोनैकधारं निरधारि धीरैः १ ॥७

अथ एकफलसंदर्भस्यैकैकमर्थमित्यत आह उदर्क इति हि यतो धीरैर्गर्गादिभिरुदर्क उत्तरफल
मरं निश्चितमेकधैकविधं न निरधारि किंतु बहुधोक्तमित्ययमप्येकः प्रकार इत्यर्थः समुद्रः
किल लक्षणशास्त्रस्य प्रवर्तकः यथा व्याकरणस्य पाणिनि
छंदसो वा पिंगलः अतस्तानि सामुद्रिकानीत्युच्यं
ते ॥१॥७ ॥

५१४३ 1365

वि० टी० ५७

अपवादापवादमाह हिमरश्मीति यदि चंद्राक्रांतनवांशकात्पापग्रहः शरसायकांशके पंचपंचाशदंशे भव
ति तदायं याभित्रहृदपञ्चवसगंडवरउपद्रवौघमोनिविडैः परैरप्यन्यगुणैर्न हन्यते दुष्परिहरइत्यर्थः १२
अथैषां योगानां विचारगम्यत्वमाह मोघाइति केपि योगाः शरीरधारिणः प्रत्यक्षतपर्णावत्यादृश्यमा
नाः अदिग्धाविनाग्निनादग्धेनअक्षेनवीजेनतुल्या मोघाःसुकार्यकृतमा न भवन्ति परेकेचन योगाः पर्णैःपत्रै रा

हिमरश्मिनवांशकात्खलोयदि खेटः शरसायकांशके अथ मन्यगुणैर्न हन्यते निविडैरप्युपसर्ग
डंवरैः ११ मोघाः शिखिदग्धवीजवद्योगाः केपि शरीरधारिणः दृढमूढफलोदयाः परे पर्णकी
र्णकृताशराशिवत् १३ इति यः प्रतिकूलकारकग्रहभावांशनिवेशदृष्टिभिः तन्वादिफले
षु दत्तदृक्सप्रत्नोत्यवतंसतां सताम् १४ इति वि० टी० ग्रहयोगवलावलाध्यायः १२

कीर्णः आधन्तो योहुताशराशिरग्निपुंजस्तद्वद्दृढ आवश्यके गूढो गुप्तः फलोदयः फलप्राप्तिर्येषां तेतथा
सुः निर्वलानां ग्रहाणां पूर्णोपि योगो न कार्यक्षमः सवलानां त्वेल्पोपि स आवश्यक इति भावः १३ ईदृ
शं विचारवंतं प्रशंसति इतीति इत्युक्तरीत्या प्रतिकूलकारका अरिष्टदायेग्रहाः भावाः अंशाश्च नेषां निवे
शेन स्थानेन दृष्टिभिश्च जायमानेषु तन्वादीनां भावानां फलेषु वलावलाभ्यामाधिक्यन्यूनताविचारात्
यया दत्तदृक् निवेशितमतिर्भवति स देवज्ञः सतां विदुषामवतंसतां अवतंसः शिरोभूषणं तद्भावं।

डुगी
५७

वैनाली अथाशास्त्रीयां लौकिकीं व्याख्यातिउपहसन्ति कवेरिति लग्नात्तृतीयस्य कवेः शुभायरे
खा लग्नस्य ग्रहवत्त्वावलोकनेनगणनार्थं प्रतिगृहमेकेकारेखाक्रियत इत्यतो निर्विंदां समय
स्तत्र द्वितीयो भङ्गुरपि रेखा ग्रहः इत्येकारीतिः नभस्थादशमो भौमो लग्नं नभन क्रिइतिद्वितीया
तथा द्वादशो शनिरपि लग्नं नभन क्रीतितृतीयारीतिः पङ्क्तिजैनेषु लोकेषु कृतस्त्या जागर्जित
रां सर्वथा निर्मूलेतिभावः कुतोजातानाकुतस्त्या अतिशयेन जागतीति जागर्त्ति तराम् आख्याता
कवेस्तृतीयस्य शुभायरेखा लग्नं नभस्थानभनक्रिभौमः तद्वच्च्युये सोपि रूपीतिरीति
जैनेषु जागर्जितरां कुतस्त्या १० उशनागुरुरिंदुनंदनः शशियामित्रगपापतापहन्त
नवपंचमकेंद्रमित्रभमण्यी पुष्टदृशाविधुंस्पृशन् ११
तत्पद आमृच नदन्तमव्ययम् ९ अथयामित्रभंगमाह उशनाइति शुक्रो गुरुर्बुधोवाकोणगः
केंद्रगः मित्रराशिगोवा पूर्णदृष्ट्या चंद्रं पश्यन् शशिनोयामित्रगः सप्तमस्थोयः पापस्तस्यतापनेऽत्र
न्यादिरहरतीतितथासौत षष्टकेंद्रसप्तमवर्जितंग्रास्तम तदुक्तम् हरिजदि वसचंद्र
सप्तमकूरदोषहृत्यकृत्पमरेषुज्यः सोमपुत्रः सितोवा उदयादिवुकधर्मे सोमपुत्रालयस्थोयदि

अथग्रहविशेषैर्वलविशेषान्फलंविशेषमाह नरइति बुधसूर्यसुतौनपुंसकाख्यौ शशिशुक्रौयुवतीन
राश्चशेषाइति स्त्रीग्रहद्विचेपिवह्नत्वंपूजार्थं नरग्रहैः सूर्यमंगलगुरुभिरुक्तपुरुषैर्मिवलैः सद्भिः।
स्त्रीणांनरोप्रियःस्यात् चंद्रभृगूवलिनौचेद्धर्मन्नुर्मनोहरःस्यात् कैःस्वभोगैर्निजभोगकोपालैः १
किंचपतिरिति वैतालीयम् दिवाहल्लेग्नात्सप्तमेशःपतिःरविःश्वशुरःमंदग्रहःशुक्रस्तस्यश्वशुरस
नरःप्रियोनीरजलोचनानांनरग्रहेरुत्कटकांतिवीर्यैः नारीनृणांचित्तहरास्वभोगेर्ना
रीनभोगैर्वलशालिभिश्च १ पतिरस्यपतिर्विरोचनःश्वशुरस्त्वमंदामदग्रहः अव।
लावलिनौदिशंत्समीस्युहशांतेष्वशुभंशुभंक्रमात् ८ शशिसूर्यसुतावनीसुतेरवि
नीचास्तगतैःक्रूरग्रहे अपितन्वधिपेनतप्यतेनिरपत्यानियतंनितम्बिनी ९ ॥७॥
प्रमदाश्वश्रूः अमीअस्तपत्याद्योनिर्वलावधूनांनेषुपत्यादिषुशुभंवलिनश्चशुभंदिशंतिददति अ
तरणांवलमावश्यकमित्यर्थः ८ किंचशशीति विवाहेचंद्रशनिभौमैःशत्रुराशिगतैर्नीचगैरस्तै
र्वीतयालग्नेशेनापिनादृशेनसंतानानितंविनीवधूर्निरपत्यानिस्संतानानियतंभवदपपरितप्यते
अत्रसप्तमभवनेनिर्वलैरितिशेषोवोध्यः वलरहितैश्चद्यूनेस्त्रीणांनभवन्त्यपत्यानीतिशौनकोक्तेः ९

अ०मं०वा०टी० ६

1368

अथान्यद्दुष्टयोगद्वयमाह नन्विति तनुर्लग्नं तनुहिनमरीचिश्चंद्रस्तयोश्चरगृहं चरराशिं गतयोः आधारे स
त्रमी अंगनाखेटः शुक्रस्तस्य दृश्ये सप्तमे चेद्यायिनो ग्रहाश्च विदिशि स्थिताः संतो बलिनः सुस्तदा कुमा
र्ग्याः कांतयुग्मं भर्तृद्वितयं स्यात् अथ यमयः जातके प्राच्यादिषु जीवबुधादिस्यादितादिग्बलाद्येन्यास्त
तनं प्राचीत्यन्तदीचीसप्तमं प्रतीची दशमम वाची शिशानपश्चैन दत्तरालविदिशां चतुष्टयं भवति
तत्रकोणगता विदिक् तदन्याऽविदिक् स्यादिमेवततस्थितायायिनो ग्रहाः केंद्रगाइत्यर्थः यानुमीलतं

तनुतुहिनमरीच्योरंगनाखेटदृश्ये चरगृहगतयोः स्यात्कांतयुग्मं कुमार्याः अविदिशिवति
नश्चेद्यायिनो युग्मइन्द्रावजमहृष्टगपेते कन्यकात्वन्यकाम्या ६

येषां ते यायिनः स्यात् प्रीतं येषां ते स्थायिनः तत्व पौराः उभयविलक्षणाश्चाक्रंदाः तेव राहेरोक्ताः
रविराक्रंदो मध्ये पौराः स्युर्वेषरे स्थितो यायी पौराबुधगुरुरविजा नित्यं शीतांशुराक्रंदः केतुकुजराहुश
क्रायायिन इति अथयोगः शौनकेन समुदितः लग्नेन्दू चरराशौ केंद्रस्थायायिनः सदा बलिनः याश्चि
द्रहसंदृश्यापति द्वयं गच्छति नारी अथ पयोगांतरमाह युग्मइन्द्राविति युग्मे युग्मराशाविन्दौ चंद्रेऽब्ज
मदृशापापदृश्चे तस्यपते प्राते न दा कन्यकाऽन्यकाम्या अन्येन काम्या स्यात् परपुरुषाभिलाषविषया स्यात् य

द्वि० टी० ५५ अथैषां फलमाह इतीति इतीमे सप्त शुभयोगाः मुनिभिरुक्ताः न केवलं विवाहे ऽपि तु जन्मकाले यात्राकालेपि शुभदाः राज्ञि योगेषु प्राग्वदुर्व्यपसीमन्तिनीत्वं राजपत्नीत्वं भजते नद्गत्नी राजा स्यादित्यभिप्रा
वः किंचास्मिन् योगसप्तके ग्रहाणां युतियोगस्तत्र वलयोगः सबलत्वं तस्मादेतत्तु राधर्यम् उत्तरस्मात्
मस्याधरस्यानि कृष्टस्य स्वभावस्तत्वज्ञेयं योगकर्तृग्रहाणां प्राबल्ये फलाधिक्यं नैर्बल्ये तन्न्यूनत्वं

इति शुभफलयोगाः सप्त सप्तर्षिमुख्यैर्मुनिभिरभिहितास्ते जन्मयात्रास्वपि स्युः भज
न्ति युवतिरेभिर्भूपसीमन्तिनीत्वं ग्रहयुतिबलयोगादोत्तराधर्यमस्मिन् ५ दिनक
रकुधिराभ्यां बालघातालवक्रौ तयइतिरविपुत्रे सैंहिकेये तमस्कः तनुयुजिकेतौ
वनकस्तेषु शोकव्यसननिधनताभिस्सपत्तेपंकजाक्षी ५ ॥ छ ॥ ग्रहा छ ॥

कत्त्वमितिभावः ६ अथाशुभयोगानाह दिनकरेति तनुग इत्युत्तीतिसर्वत्र संबध्यते दिनकरे
लग्नगे बालः भौमे पातालमुखं शनौ द्वयः राहौ १ तमस्कः केतौ १ त्र्यंतकः एषु पंचसु यो
गेषु वधूः शोकव्यसननिधनताभिस्सप्पते कर्मकर्तरिरूपं तत्तीयाकरणे
यद्वाकर्मणिरूपं तदाकर्तरित्तीया एतन्मुख्यैकं फलम् ५

श्रीदुर्गायैन
५५ म०

अथसप्तमदशमचंद्रस्यविशेषमाह अनुर्येति प्रमाणिका तुर्यंचतुर्थं कायोलग्नं ताभ्यामन्यानिकेंद्राणि
७।१० तनुगतः शशीशुभःस्यात् कीदृशः सुहृदः स्वस्यसौम्यस्यवावर्गेणयुतः सुहृदाशुभेनचेक्षितः
मयूखैरश्मिभिर्मांसलः पुष्टः पूर्णमण्डलः बहुमांसोस्याऽस्तीतिमांसलः सिध्मादिभ्यश्चेतिमत्
त्वर्थीयोलः ईदृक्चंद्रःसप्तमेदशमेपिस्थितःशुभइत्यर्थः अकायकोणकेंद्रगइतिपाठेलग्नवर्जं
कोणकेंद्रस्थः ५।९।४।७।१० गतइत्यर्थः तथाचशौनकः त्रिकोणसप्तमाम्बरव्ययायगोविलग्न

अनुर्यकायकेंद्रगः सुहृत्स्वसौम्यवर्गयुक् सुहृच्छुभेक्षितः शुभः शशीमयूखमांसलः २
शशिनतयसिताभ्यां नंदभद्रौ च भाभ्यां जय इति तनुयाते जीव इत्येषजीवे अमृतसुर
गुरुभ्यां स्याद्वरो ज्ञेज्यशुक्रे विजय इति विशुक्रं तच्चजीमूतमाहुः २

गतः हिमद्युतिःशुभर्क्षगःशुभेक्षितश्चशोभनइति अत्रव्ययस्थोपिगृहीतः सतुनारदेनमहादो
षेषुपठितोसोग्रंथकृतानत्यक्तः २ अथशुभयोगानाह शशीति मालिनी तनुयातइति यथोचि
तेविपरणतेग्रंथकंसवध्यते बुधशुक्राभ्यांतनुगताभ्यांक्रमेणनंदभद्रौयोगौस्तः बुधेलग्नेनंदः
शुक्रेभद्रः उभाभ्यांबुधशुक्राभ्यांजयः जीवेलग्नगेजीवः जीवशुक्राभ्याममृतभाभ्यांलग्नगाभ्यांस्या
वरः बुधगुरुशुक्रैर्लग्नगैर्विजयः नमेवयोगंविशुक्रंजीमूतमाहुः बुधगुरुभ्यांलग्नगाभ्यांजीमूतः २

अथ ग्रहबलार्थमाह षडिति शार्दूल॰ अशुभाः पापाः ६।३।११ स्थिताः शुभायान्यत्राशुभायभवन्ति
सौम्याः शुभाः बुधगुरुशुक्राः ८।७।१२ स्थिता न शुभाः अन्यत्र शुभाय शशीचंद्रः ३।६।१२ शुभः शनि
रवीउपलक्षणत्वाद्राहुकेतू अपि मतावष्टमे शुभाय अपरे चं॰मं॰बु॰र॰शुक्रास्तत्र भंगाय लग्न
भंगकर्त्तार इत्यर्थः किंच शशितनौ चंद्रलग्ने क्रूरद्यूनवृत्तान्विते भंगाय भवतः क्रूरे द्यूनं सप्तमं ष्ट

षट्त्र्यायेष्वशुभाः शुभायनिधनद्यूनांत्यवर्ज्जे परेत्र्यायार्थेषु शुभाः सुधीम
तोशनिरवीभंगाय तत्रापरे क्रूरद्यूनवृत्तान्विते शशितनौ त्रौ स्तेति   ७२२
नज्ञौविधुर्लग्नेसोमसितनाथिपाः द्विविसितःसेंदुर्विनष्टोशपः १

नमावृत्तं ययोस्ते द्यूनवृत्ते ते च ते अन्विते च तथा चंद्रस्य लग्नस्य वा सप्तमं क्रूराक्रांतं स्वयं चंद्रो लग्नं
वा क्रूराक्रांतं चेत्तदा लग्नभंग इत्यर्थः किंच लग्नचंद्राभ्यामस्ते सप्तमे स्थितस्तौ शुक्रो बुधो वा सो
पिभंगाय लग्ने विधुश्चंद्रः सितः शुक्रः अधिपाः स्वामिनः लग्नांशद्रेष्काणानामष्टमे लग्नादे।
वनत्त चंद्रात् सौमग्रहणात्सितः शुक्रः सेन्दुः यत्र क्वापि स्थितो भंगाय अंशपो नवांशाधीशो
विनष्टोस्तंगतो भंगाय स्यात् १

ण्यादीनामंबराणां वसनानां द्रविणस्य धनस्य च भोगभरेणोन्नरवानि संज्ञातानि सुखानि ददाति अ
थ सर्वसाधारणमाह सर्वेपीति सर्वेपि ग्रहाः अबलाः स्थानादिबलहीनाः सबलाः सर्वभवने सुलग्नादि
ष्वपि किंचित् शुभमशुभं वा न ददते अर्थादुक्तं सर्वफलं सबलानामेव जायते ११ व्ययइति रुचिरा
च्छंदः व्यये द्वादशे स्थिताः शुभाः बुधगुरुशुक्राः स्त्रियं सनाथं भानिमित्तं कृतेन धनापचयेन कर्षिणां कु
र्वन्ति शनिः सुरापानमद्ये रुचिर्यस्याः सा तां विधुश्चंद्रः दुर्विधां दुष्टकर्मकारिणीं जानाति कुजोऽर्कस्त्वदा

व्यये शुभाः सद्व्ययकर्षिणीं तां शनिः सुरारुचिं रचयति दुर्विधां विधुः अदक्षिणां व्ययवस्तु जं कु
जो रविर्विरूपवयस्यति रुचिरामपि स्त्रियम् १२ इति मुनिजनमतमनन्वितर्के प्रतिगृह
चरखचरोद्भवदर्के परिविगणय्य विशेषमशेषं फलमिदमखिलमनुक्तितरेखम् १३
इति श्रीविवा० ग्रहभावफलाध्याय एकादशः ११

।।वामो यो व्ययवों गंतत्र रुग्व्याधिर्यस्याः सां
रविः रुचिरां मनोज्ञामपि विरूपां करोति रुचिरेति छंदोनामापि १२ अथ पूर्वाभावफलानां प्राशस्त्य
माह इतीति इतीदमनंतरोक्तं फलमखिलं सर्वमनुक्तितरेखमनुक्रमर्यादं यथावद्भवतीत्यर्थः
कीदृक् फलं मुनिजनानां मतेन संमतं अतनुःपृथु वितर्को यस्य तत्तथा यद्यु ज्ञानार्थमिव दृश्यते
न यापि ग्रहबलादिविचारवशाद् कुविचारमित्यर्थः प्रतिगृहं गृहं गृहं प्रति प्रति गृहे चरं तिने प्रतिगृहं च

अX 1373

वि० टी० ५३

अथ नवमस्य शशिसुतेति मालिनी नवमस्थे नवमभावे बुधे हृष्टयुक्ताः कुमारी सांद्रघनं यत्सौभाग्यं तत्सलील
यासरलेन हसितेन हसितेन स्त्रीयेन कांतस्य भर्तुः स्वांते चित्ते केलिः क्रीडा यस्याः संबंधेन सा तथा तां करो
ति रविशशि निकुजाः कापट्यमुक्तमनसं चंद्रः कन्यापुंसे ९ अथ दशमस्य शनिरिति मालिनी व्योम्नि दशमे
शनिः कन्यकां नियमो व्रतादि स्वीकारः शौचं पावित्र्यं ताभ्यां हीनां करोति वक्रो भौमः शाकिनी मांसभक्षक दे

शशिसुतगुरुयुक्ताः सांद्रसौभाग्यलीला सरलहसितकांतस्वांतकेलिं कुमारीम् रविरविसुतवक्रा
:केतवाक्रांतशीलां तपसि तुहिनरश्मिः [illegible]सवित्री करोति ९ शनिरनियमशौचां कन्यकाम।
न्यकार्यैर्विधुरपि विधुरांगीं शाकिनीं व्योम्नि वक्रः रचयति रविरुग्रां कोविदः कर्मणि ज्ञामविकृ
तसुकृतश्रीमालिनी मार्ययुक्तो १० एकादशे दर्शितां प्रमुखाग्रहे द्वार रत्नांवरद्रविणभोगभरो
न्सुखानि पाणिग्रहे ददति दीर्घदृशां सुखानि मा० शा० वैपि सर्वभवनेषु बलानकिंचित ११॥

वता विशेषसदृशी रविरुग्रामशीलां कोविदो बुधः कार्मणं वशीकरणार्थं तद्रुक्कर्मस्तदभिज्ञा गुरुणा विशेष
अविकृते ये सुकृतं पुण्यं श्रीर्लक्ष्मीशोभे ताभ्यां मालने शोभते तथा तां अनेन मालिनीति छंदो नामापि
सूचितम् १० एकादशभावस्य एकादशेति वसंत० दीर्घादृग्लोचनं यासां तासां पाणिग्रहे विवाहे ११
स्थिताः दशाशतानि सहस्रमंशावो रश्मयो यस्याः सौ तथा स मुखमादिर्येषां ते सूर्योदयो ग्रहेंद्राः रत्नानीमा ५३

अथ षष्ठभावः विधुरिति पृथ्वी वैरिगः षष्ठगः विधुश्चंद्रश्चारुभर्त्तृवधूनां निधनं व्यनक्ति प्रकटयति बुधः
शत्रुभयं दत्ते भानुमान्सूर्यः जयं कुजो भौमः कुशलत्वं लेभं चेत्कर्म्मणः शनि विगतवैरितां निःसपत्नतां
उशना शुक्रः सहचरेण भर्त्रा समं सरिपुत्वं वचसांपतिर्गुरुः पतिभर्त्तारं न जाता शत्रुस्तुतिर्यस्य तं व्यनक्ति
तत्पतिशत्रुः कापि न श्रूयत इत्यर्थः ६ अथ सप्तमभावः बुध इति शिखरिणी विवाहे स्तः सप्तमभवने स्थितो
विधुर्निधनमिंदुजः परमयंत्रयं भानुमान्कुजः कुशलमर्कमूर्विगतवैरितां वैरिगः रिपुत्वमुशनाः
समं सहचरेण चारुमुर्वा व्यनक्ति वचसांपतिः पतिमजातशत्रुस्तुतिम् ६ बुधो वंध्यामिंदुः परिचि
तसपत्नीपरिभवां गलत्कुक्षिं पंगुः परनररतां दानवगुरुः अवीरामस्तैकोगुरुस्त्वमररसेवाव्यसनिनी ७
विवाहमाहेयः स्त्रियमतिरजस्कां जनयति ७ सितसितकिरणेज्यामस्त्वेवमस्तु वेश्मन्यनवरत
सुखायुः संपदे सूर्यसौरी भवति पतिशरीरद्रोहकृद्भौमदेहि दुहितेयम्हमस्त्वीनांयत्नमणे दोषा
बुधः स्त्रियं वंध्यां जनयति इंदुः परिचितः प्रत्यक्षमनुभूतः सपत्न्याः परिभवस्तिरस्कारो यया सा तां जनयति
पंगुः शनिः गलत्नो भ्रश्यन्तो गर्भो यस्यास्तां दानवानां गुरुः शुक्रः परनरे रतां व्यभिचारिणीं सूर्यः अवीरां
विधवां माहेयः कुजो निरजस्कां प्रदरव्याधिमतीं करोति ७ अथाष्टमस्य सितेति मत्तवेश्मन्यष्टमभावे
मृगचंद्रगुरवः दुहितॄणां व्रजानस्य गृहं कमलं तदन्य खं या सा तां तासां वधूनां मृत्यवे मरणाय भवन्ति सूर्यः

13

1375

वि॰टी॰ ५२

इनेति द्रुतविलंबितम् सहजे तृतीयभावे रविशशिनौ वधूं धनवतीं कुरुतः सचिवः शुक्रः सखो गुरुः स्वल्पधनां
चंद्रो भाग्यवतीं भौमबुधौ पुरुषवतीं देवानां रिपवो दैत्यास्तान् उपनयत्याचार्यः सन्निहितया सञ्जको देव
रिदेवरेनयते देवरगामिनीं करोति समौ तृदेव देवरावित्यभिधानात् ऋकारान्तो देवृशब्दः ३ च
तुर्थभावस्य दारिद्र्यमिति सुखे ४ रविर्निर्धनतां सृजति भौमः ४ वरांगशिरः स्त्रीप्रकरणात् स्मरमन्दिरं वा

इनशशिनौ सहजे सधनां वधूं तनुधनां सचिवः सुभगां शशी सुकृतिनीं कुरुतः कुजसोमजौ न
यति देवरिदेवरिपूपनीः ३ दारिद्र्यं रविरर्वनीसुनो वराङ्ग्या घातं गुरुभगुजौ द्रुजाः प्रभुत्वं
वाल्यक्रुः प्रियपुर्वीति शनिः स्तनाभः शून्यत्वं सृजति सुखे सुवासिनीनाम् ४ सत्पुत्राम
सुरसुरेज्यसोमपुत्राः पुत्रारिं रवेरसुतप्रजां द्विजेंद्रः शोकार्त्तामवनिसुतः सुतेत्र सौरिः संतानं

तस्य भंगं बुधगुरू भगवः स्वामितां चंद्रः ४ वाल्येपि भर्तृवियोगं शनिः स्तनाभः तास्तन्यदुग्धेन शून्यतां
सुवासिनीनां प्रोढांगनानां चिरंटीनां सुवासिनीत्यमरः ४ पंचमभावः सत्पुत्रेति प्रहर्षिणी सुते पंचमे तिष्ठ
तीति सः व्रमुरेज्यो भृगुः सुरेज्यो गुरुः सोमपुत्रो बुधः कुमारी सत्पुत्रां कुर्युः रविः ५ पुत्रारिं पुत्रघाति
नीम् चंद्रो सुतासुने तरां प्रजायस्याः कन्याप्रसूं भौमः शोकपीडितां शनिरिनापत्यं शनिः सता

दुर्गा ५२

सर्वमरिपराक्रमेत्यादिना साधारण्येन ग्रहाणां भावफलान्युक्तान्यधुनानुप्रतिस्थानं विशेषतः आह तत्रादौ ल
ग्नस्य ग्रहाणां फलानि चिरंजीवेति शिखरिणी सूर्यौ लग्ने स्थितो जीवो मृगदृशं वधूं चिरंजीविनां दीर्घायु
षं सृजति कविः शुक्रः अविरलो निविडो योऽनंगः कामस्तेन सुभगां भाग्यवतीं चंद्रकुजौ यमस्य यायुव
तिस्तत्पार्श्वप्रणयिनीं यमलोकगां सृजतः बुधो भर्तुर्भक्तां शनिः १ अशीलां दुष्टां त्रयीमूर्तिः सूर्यः १

चिरंजीवां जीवः कविरविरलानंगसुभगां मृगाक्षीं पुत्रौ यमयुवतिपार्श्वप्रणयिनीम् बु
धो भर्तुर्भक्तां मृगदृशमशीलां शनिरपि त्रयीमूर्तिर्मूर्तौ दिशति शिखिशस्त्रादिनिधनम्
१ नितांतधनिनीं धने सितसितांशुजीवं द्विजारुजादहनदस्युभिर्विधुरतां धरानंदनः सुते
ष्वपि सितं पचां मलिनमूर्तिमर्कात्मजः स्त्रियं सहजदुर्भगां जनयति द्युतीनां पतिः २ ॥७

शिखिनाग्निना शस्त्रादिना च निधनं सृजति १ धनभावस्य पृथ्वीवृत्तम् धने द्वितीयभावे राश्यिताः शु
क्रचंद्रगुरुबुधा नितांतमत्यन्तं धनवतीं वधूं जनयंति धरानंदनः कुजः रोगेणाग्निना चोरस्य र्व्यादिना
वा विधुरतां विधवतां सृजति शनिः पुत्रेष्वपि सितं पचनीति सितानां कृपणानां कृपणां मितनरवेचेति
स्वन खिन्वान्त्मन् मलिनरूपां च सृजति द्युतीनां पतिः सूर्यः सहजदुर्भगां जनयति स्वनएव भाग्य

वि० टी०
पृ१

1377

भवेति सूर्यः ११ कुजे द्युशनिः ३ एभिर्ग्रहैः क्रमादेभिर्ग्रहैः सनाथैः सहितैः सद्विदलेन्दुर्नामयोगः परिण
मतिर्जायते किं करिष्यन् इंदुमुख्याः अङ्कद्रवदनायावध्वाः कुलयुगलं पतिपितृकुलद्वयं तस्योद्धृति
रुद्धरणं तत्र धुर्यतां सामर्थ्यं विधास्यन् अत्रोढा कुलद्वयोद्धारणे समर्था जायत इत्यर्थः १० वयेति

भवपरेभवविक्रमैः क्रमेण द्युमणिमहीसुतसौरिभिः सनाथैः परिणमति दलेन्दुरिन्दु
मुख्याः कुलयुगलोद्धृतिधुर्यतां विधास्यन् १० व्ययनिधनतनुस्थमंदचंद्राहणकि
रणोग्रशल्यजगुर्भनीद्वाः इह वृसिकुलान्तकेकुमारीकुलमारीनचकापिकार्यसि
द्धिः ११ तनुनवभवगैर्यथाक्रमेण बुधविबुधार्चितपङ्क्तिभिर्गजः स्यात् इह युवतिर
हंकृताकृतार्थान्वितरतिदैवतदेवतत्परा वा १२ इति विवा० ग्रहयोगाध्यायो दशमः १०

औपच्छंदसिकं शनिः १२ चंद्रः ८ सूर्यः १ अयं कुशल्ययोगः कुशल्यनामतया यादवकुलक्षयकरे त्रयो
गे ऊढा कुमारी कुलनाशिका भवति कापि कार्यसिद्धिर्न स्यात् ११ नन्विति पुष्पिताग्रा बुधः १ गुरुः ९ श
निः ११ एवं गजो योगः इह युवतिरूढा हंकृता सा हंकारा कृतार्था निष्पादितार्थेषां स्तान्ददाति यद्वा देव
ते देवतार्चने दैवे भाग्ये च तत्परा सुरार्चनेलग्नाभाग्यवतीच स्यादित्यर्थः १२ इति श्रीविवाहवृंदा

५२

1378

स्त्रनाइति भुक्तः ५ जीवचंद्रौ ३ तदंगनायाः कन्यायाश्चभ्युपगमोविवाहश्चेत् यदंगनाभ्युद्गमः क
न्यालग्नं नंदयमानंदोनामयोगस्तेन सुंदरीसांद्रसौख्यावंशयोः पितृभर्तृकुलयोरानंदं विस्तृणाति
विस्तारयति शीतज्ञत्वमीव: ७ व्ययेति पुष्टिनागा भौमः १२ भृगुः ६ शनि ४ क्रमात्स्थिताश्चेत्तदेष
कुठारः इहयोगेविटपपल्लवेभंऽसमूहे विहरति कीदृशी संहतानारिजनः स्ववंशोययामा पटे वस्त्रा

स्त्रनौ भुक्तः सौगिराः शीतरश्मिर्दुश्चिक्ये स्यादंगनाभ्युद्गमश्चेत् आनंदोयं सुंदरी सांद्र
सौख्यानेनानंदं वंशयोर्विस्तृणाति ७ व्ययरिपुहिबुकेषु वक्रभृगु क हृमगौ सुतेः क्र
मशः कुठारएष: इहविहरतिसंहत स्ववंश्या विटपपल्लवपल्लवेखितामिसारा ८ रवि
कविरविजेंदुभिः क्रमेणव्ययधनषट्निधनेषुकर्मरएष: इत्विहितकरग्रहाग्रहालि

चल्लेल्लेखितोभिसारोययाः सानिःसंदेहमभिसारिलीत्यर्थः नरंभोगार्थिनीयातिसंकेतं साभिसा
रिकेतिकोशः पाठांतरे भिचारो व्यभिचारः ८ रवीति सूर्य १२ भृः २ शः ६ चंद्रे ८ स्वेषुस्थितेः कूर्मयोगः
इहविहितः करग्रहोयस्याः सापरः शतानिग्रहालि पारि भ्रमति शनेभ्यः परागतिपरः शतानि पार
स्करादित्वात्सुट् यद्वापरः शब्दो निपातः इति भोजराजः शते भ्योधिका नीत्यर्थः कथमाज्ञिष्यतयाद

विं०टी०
५०

एकेति भौमसूर्यौ ११ शनिः ६ चंद्रः २ बुधबृहस्पतिभृगवः ५ चेद्भवंति तदा श्रीवत्सनामा योगः रायः रूपेण सौंदर्येण रिक्तां अन्यामपि वधूं सुखयति कीदृशीं सौभाग्यस्य योभोगभरस्तस्य भंग्या रच नया नरंगिता नि संजाततरंगाणि यांगानि यस्याः सा ५ सौम्येति शुभाः ८ पापाः ३।११२ सद्यायथं कोमुकं नाम योगं कुर्युः अस्मिन्योगे परिणीता कन्या कांत वेषा मुदरने पण्य धरा वेश्या रामं वेश्या रम

एकादशे कुजरवीरविजः सपत्ने वित्ते विधुस्तपसि शेषनभश्चराश्चेत् श्रीवत्सराय सुखयत्यपि रूपरिक्तां सौभाग्यभोगभरभंगितरंगिताङ्गी ५ सौम्याः स्मरेत्वाखौतरा श्य रसौम्या कुर्युर्योगं कार्मुकं कन्यका स्मिन् हत्वा कांतं कांतवेषा विषाद्यैर्वेश्यारामं रमीति स्वरीत्या ६

यतीति तं वेश्या नोगिनं कामुकं रंरमीति अतिशयेन रमयति यत्नोक्तं कया स्वरीत्या निजोपभोगकौशलेन किं कृत्वा विषाद्यैर्विषशस्त्राद्यैः धनादिभिर्भर्त्तारं हत्वा तथा च ग्रंथान्तरे निधने यदि सौम्याः क्रूरा व्ययधनस्थिताः धनुर्योगं वदन्तीह पतिं हंति सदा बुधाः तथा च वामदेवः क्रूरेषु वित्तव्ययगेषु लग्नाद्धन भवनस्थेषु ममृति स्थितेषु ऊढा शुभदयत्र सस्वचारिणी त्वं विषेणाशशस्त्रेण पतिं निहंति ६

५०

तन्विति वृत्तं० लग्नगैः शुभैरष्टमगैः पापैर्ध्वजो योगः इह कृतमुद्वहनं यस्याः सा वधूः गुणगणालाभयुता
च भवति इंगितैर्हावभावादिचेष्टितैः प्रियमनसोयमनेवशीकरोति उन्मुखो विभ्रमो विलासो यस्याः सा
भवति २ अखिलेति पापैश्चतुःकेंद्रगतैर्वापी योगः इह योगे ऽर्पितो दत्तः पुंसेवरायकरो ययासापरि
णीता वधूः स्वपक्षपति मंदिरं जनयित्रीः पितृगृहकुरुते कुशाद्वा स्वैवामुन्नत्स्वानान्नदान्कुरुते पितृग
हे व्याभिचारदुष्टापरीवादमन्नभवतीत्यर्थः ३ गगनेति शुभैर्ग्रहैर्दशमचतुर्थे नवमे सुयथायस्या
तनुनिमीलनगैः शुभाशुभैः ध्वजइतीहकृतोद्वहनावधूः सगुणगणालाभवतीभवतीगितैः प्रिय
मनोयमनोन्मुखविभ्रमा २ अखिलकेंद्रसखेः खलखेचरैर्भवतिवापिरिहार्पितपुंस्करा युव
तिरुज्झितकांतगृहागृहे जनयितुः कुरुते कुरुतोत्स्वान् ३ गगनतोयतनव्ययशुभैर्मृग
गीदृतिशंखमशंसखलयत्नसो परिणयेन पयोरुहचक्षुषां धनयशोनयशोभितमंत्रिया
तैः शंखसंज्ञयोगं मृगाक्षीनिगदंति अस्मिन्योगेऽशं दुःखं सखलयति श्रुतिवघ्नाति निराकरोती
त्यर्थः केन परिणयेन कासां पयोरुहवच्चक्षुषां कमलनयनानां वधूनां कीदृशां धनेनय
शसानयेनशोभिनीरम्यानतनोर्वपुषः श्रीर्यासांतासां ४ ॥ ७ ॥ ८ ॥

विवृं०टी० अत्रोदाहरणमाह क्रूरमष्टममिति जन्मकालेष्टमं क्रूरमरिष्टमशुभमशंति वा धंति मुनयः इयमहहनरी
५१ त्तिर्विवाहमार्गेन भवति तथाहि जन्मकालेष्टमः क्रूरोऽशुभः विवाहेऽप्यशुभः जन्मनि सप्तमः शुभो विवा
हेत्वशुभः अतो नयोः शास्त्रयोरन्यथात्वमिति हेतो यत्र विवाहे सो गोचरमार्गो रथ्योद्धृतो रथ्ये स्रुहृतोति
ष्टः अस्य मार्गेष्लेषः गोचरमार्गः पारंपर्यागतः स्फुटः रथ्योद्धृत इति छंदसोपि सूचनम् ७ इति विवाह
वृंदावनटीकायां मासविचाराध्यायः ८ अथ प्रातस्त्विकं भावफलमुक्त्वा योगजमाह चक्रेति श्लो
क्रूरमष्टममरिष्टमिष्टदं सप्तमं शुभमशंति जन्मनि नेयमहहनरीतिरित्यसावत्रगोचरपथो
रथ्योद्धृतः ७ इति विवाहवृंदावने मासविचाराध्यायः ८ चक्रस्यार्द्धं प्राचि पश्चात्क्रमेण
क्रूराक्रूरैश्चक्रमित्यामनंति अत्रोढायाः सुभ्रुवः स्वैरिणीत्वे भ्रामयत्येवं चक्रवच्चित्तवृत्तिः १॥
लिनी चक्रस्य प्राच्यर्द्धं पश्चादर्द्धं चक्रमेण क्रूराक्रूरैः कृत्वा चक्रमिति योगमामनंति अथ मर्थः दशमभावि
वभागानारभ्य चतुर्थभावभागपर्यंतं चक्रस्य पूर्वार्द्धं चतुर्थभागानारभ्य दशमभागपर्यंतं पश्चिमार्द्धं
तत्र चक्रस्य पूर्वार्द्धं यदा क्रूरग्रहाः पश्चार्द्धं सौम्यास्तदा चक्रं नाम योगः अस्य फलं अत्र योगे ऊढायाः प
रिणीतायाः सुभ्रुवो योषितश्चित्तवृत्तिः स्वैरिणीत्वे पौंश्चल्ये चक्रवद् भ्रामयति चतुर्थे स्वैरिणी प्रोक्ता.

यदि चांद्रे मुख्यत्वं तदा पृथक् सौरमानं कथमुक्तमित्याशंक्याह प्रायइति शालिनी यदि प्रायो बाहुल्येन सौरमा
नं विवाहे स्वीकृतं तत्तत्फलेन चांद्रमासं किमाहुः शौनकादयः धनमानपरिभ्रष्टा चैत्रे वा तत्र मेषु ना
त्वसतीत्यादिना यस्मादेतौ सौरचांद्रमासौ विवाहे उक्तौ तस्मात्तदैकत्वे न तयोः सौरचांद्रमासयोरेकत्वे सति फला
प्तिः सम्यक् परिपूर्णा स्यात् केवलः सौरमासः चांद्रापेक्षया किंचिदूनः चांद्रस्य मुख्यत्वादित्यर्थः ४ एवं सौरचां
द्रयोर्बलाबलमुक्त्वा गोचराष्टकवर्गयोर्बलमाह योषितांस्त्रीणां गुरुपतंगयोर्गुरुसूर्ययोर्गोचरे शोभने सति कु

प्रायः सौरमानमिष्टं विवाहे तत्किं चांद्रमासमाहुः फलेन यस्मात्सम्यक्तत्फलाप्तिस्तदैको सौरो मासः
केवलः किंचिदूनः ४ योषितां गुरुपतंगगोचरे शोभने निगदितं करग्रहः अष्टवर्गविधिना तदत्यये सूर्य
शुद्धिमपरे नृणां जगुः ५ अष्टवर्गफलमेव ज्ञातकेनास्य किंपरिशिष्यते पितृस्वता सत्यमुक्तं हन जन्मशास्त्रयो

रुक्तः शुभः मतांतरमाह सूर्येति अपरे नृणां पुरुषाणां सूर्यशुद्धिं जगुः ननु गुरुशुद्धिं गोचरविधिना तदत्ताभे
ष्टकवर्गविधिनेति उक्तंच प्राग्भानुरष्टपंचयेति नृणां गुरुशुद्धिसुव्रतबंधरवातो न विवाहे शूद्रादीनां तु व्रतव
धाभावाद्विवाहएव गुरुशुद्धिः सूर्यशुद्धिश्चेति ५ ननु गोचरस्य कथं मुख्यत्वं तत्राह अष्टवर्गफलमिति
ज्ञातके अष्टवर्गफलमेवास्ति नतु अयं चंद्रराशिफलं तदेव गोचरफलं संहितासु पठितं अतस्तस्याष्टकवर्ग
फलस्य परिशिष्यते पितृस्वता किं न स्यात् गोचरफलं स्वेकस्मात् चंद्रराशेरेवाष्टकवर्गफलं त्वष्टराशिभ्यः अतोस्या

वि०टी०
४८

धंवक्तुं पूर्वपक्षमाह नेष्टइति सुंदरीणामुपयामे विवाहे मृगयुक्तिमकरगेरवौ पौषे नेष्टः मकरगार्कस्य शु
भत्वेपि शुभपौषयोगात्सनेष्ट इति भावः ननु विपरीतं कुतो न स्यादित्यत आह आहृतइति प्रवीणैः पण्डित
मन्यैर्मृगयुक्तिरवौ पौषश्रैष्ठ्यदाहृतः मकरगतार्कस्य शुभत्वात् नतु चैत्रोपयमसहचरे मेषगे भास्करे सति चारु
शुभः स्यान्नचैवमस्ति किंचास्य प्रसिद्धस्य फाल्गुनस्य माण्डव्याद्यैः स्मृतशुभफलस्य प्रसंगाद्योगान्मीनो
मीनगतार्कोपि विकृतफलो यथा वक्तफलः किं न स्यादपि तु विकृतफलएव शुभफलकाल्गुनयोगाद्दुष्टो
नेष्टः पौषो मृगयुक्तिरवावाहृतश्चैत्रश्च प्रवीणैः श्चात्स्वैश्चैत्रोपयमसहचरे भास्करे सुंदरीणाम् माण्डव्या
द्यैः स्मृतशुभफलस्यास्य किं नोपयामे मीनोपि स्यादविकृतफलः फाल्गुनस्य शुभसंगात् २ नयो
ननिंद्यो यदि फाल्गुनेस्यान्मेषस्तु वैशाखगतो न निंद्यः मध्याश्रितौ चावपि वर्जनीयौ वित्याद्यिवाचो
पि मीनो दुष्टफलएवेति भावः नचाप्येवमस्ति एवं सौरप्राधान्यकर्तृ रानेष्टद्वयम् २ एवं सति सिद्धांतमा
ह नयइति यदि फाल्गुने झषो मीनगतार्कस्तदा न निंद्यः चांद्रस्य मुख्यत्वात् एतत्प्रसंगेन व्रतबंधेपि निर्ण
यमाह मेषइति मेषो मेषगतार्को यदि वैशाखगतस्तदा न निंद्यः मेषगेर्कं व्रतं न हीनं शुक्रे र शुभस्य मे
षस्य शुभवैशाखयोगाच्छुभत्वमितिभावः प्रकृतमाह मध्याश्रितावपि मध्याश्रितौ चैत्रगो मीनमे
षगतार्कावपि वर्ज्यौ चैत्रदोषात् मीनो हि स्वरूपत एवाशुभो मेषस्तु चैत्रयोगादिति चांद्रस्य मुख्यत्वादि

मध्वीलां पुक्तिरियमकैवेसर्थः ३

नियमेव युक्तिः ३

तिसर्वत्रहेतुः इत्यादिवाचोमेवमुक्तवता
४८

७ ३

इतिग्रंथकारोक्तिः नैतच्चतुरस्रं प्रवृत्तिकालेचांद्रदिनवर्षादेरपिप्रवृत्तिः तस्यापिमुख्यत्वंकथंनवक्तव्यं तस्मादनयायुक्त्याचांद्रमासस्यश्रेष्ठत्वंचवक्तुमुचितम् किंच युक्त्यंतरं संहितागमबलात्तच्चख्यते नक्षत्रेणयुक्तः कालः सास्मिन्पौर्णमासीति संज्ञायामितिचपाणिनेरनुशासनात्पौषः पौषीत्यादिकासंज्ञासौरादौनोपपद्यते तस्माच्चांद्रमासएवमुख्यइति अतएवनारदादिभिरपि यस्मिन्मासेपौ

एवंपौषेमाघमुख्यगतेभास्वतिस्यान्नवामावु
क्तेः श्रेयान्यत्रिगायनविधाविंदुमासोस्मिन्नस्मात् १

र्णमासीयेनधिष्ण्येनसंयुता तन्नक्षत्राह्वयोमासः पौर्णमासीतदाह्वया तस्यद्वौमुख्यकृष्णौरवौदेवपित्र्यौचतावुभाविति अभिधानंच पक्षौपूर्वापरौशुक्लकृष्णौमासस्तुतावुभाविति अतएवस्मृतेप्युक्तं मासस्तपाश्चतिष्यस्तुहिमांशुमानादिति अतःसौरादौमासप्रयोगोगौणएवत्याज्योऽत्रनीयइत्यस्माकंसिद्धांतः तर्हिरवेरवैशाखिगमत्रैरायणमितिविवाहेसौरमासाः कथमुक्ताः नाषाढप्रभृतिचतुष्टयेविवाहइत्यनेनचांद्रमासाः प्रधानत्वेनोक्ताः अनयोर्विरोधेसतिसमुक्तिकंनिर्ण

वि०टी० ४७

अथ मासगोचराध्यायः तत्रादौ सौरचांद्रमासयोर्विचारमाह चैत्र इति मन्दाक्रान्ता यतश्चैत्रे मासि शु
क्लप्रतिपद्दिने तिथौ रविवारे सर्वैर्गगनगतिभिर्ग्रहैर्मेषादौ स्थितैर्भूर्भुवः स्वः प्रवृत्तिरासीत् भूर्भुवः
स्वरित्यव्ययानि क्रमेण लोकत्रयवाचकानि तथा चोक्तं भूर्लोकः ख्यातो दक्षिणो व्यक्तदेशान्तस्मात्सौ
म्योऽयं भुवः स्वश्च मेरुरिति अतः पृथ्वीरातल्लोकत्रयाधिष्ठिता एषां लोकानां प्रवृत्तिः प्रथमनिर्माणे
सृष्ट्यारंभ चक्रे कमलोद्भवेनेति लंकानगर्यामुदयाच्च भानोरिति यदुक्तं तस्यैव मासे मृगगतरवगते

चैत्रे मासि प्रतिपदि तिथौ वासरेऽर्कस्य सर्वैर्मेषादिस्थैर्गगनगतिभिर्भूर्भुवः स्वः प्रवृत्तिः

मकरादिस्थिते भास्वति भास्करेणासीत् तस्मात्परिणयनविधाविंदुमासश्चांद्रमासः श्रेयान् अत्रेदमुक्तः
अयं भावः लंकायां क्षितिजगतयोर्मेषादिस्थितचंद्रार्कयोः किल लोकत्रयस्य युगपत्प्रवृत्तिः तत्र चं
द्रार्कयोः समकालत्वाच्चांद्रमासादिः स एव मेषगतार्कत्वात्स एव चैत्रमासः तदानीमादित्यस्यैव
होरा अतोऽर्कवार इत्यादि सर्वं पौषमकरादिस्थितेऽर्के न घटते यतः सौरवर्षमासादेः प्रवृत्तिः
संहिताकारैर्मकरादिरेव स्वीकृतः उक्तं च मृगादिराशिद्वयभानुभोगात् इत्यादि अतश्चांद्र एव मुख्य दुर्गा ४७

1386

अन्ते मपत्रघटिकाल्लिमिष्टमाद्य यो स्तं त्वं वरम रो स्पि नार्द्र विंबः

कयथातिथ्योदग्धत्वं नक्षत्रे पापवेधादिकमिति अथ पंचांगानां प्राकृतदोषविरहः तस्य योगकरणयोरनभिधाना
त् अपि च शुद्धिशब्देनागंतुकदोषविरह उच्यमाने वा दोषः स्वार्जूरसमांघ्रिभमित्यादिना रत्नादिभिः पठितेषु दोषे
षु पौनरुक्त्यापत्तिः एकविंशतिपरिगणनया संभवश्च तस्मात् पंचांगानां प्राकृतिकसेवविरह एव शुद्धिरिति।
स्थिते च तएवंविधायां पंचांगशुद्धिस्तन्मयमेव गोधूलिकमित्युक्तं भवति अथ यदिदं वृषे पंचांगशुद्धिमयमेवं
विवाहं धिष्ण्येरितिवदतो यमाशयः विवाहविहिते नक्षत्रे सति पंचांगानां ग्रहादिजनितदोषाभावलक्षणा
शुद्धिर्विवक्षिता तदपि न योगकरणयोस्तस्यासंभवात् यथासंभवमिति चेत्तदपि न पंचांगस्यैव यथ्यान्
कालार्गलानियतयेतपनार्द्धविंबवेलाव्यवस्थितिरियं रचयांबभूवे ६ इति विवा॰ गोधूलिकाध्यायः ८
तः शुद्धिशब्देन प्राकृतदोषाभावः स्वीकर्तव्यः नहि पंचांगशुद्धिर्वा सौम्यार्कशनादित्यादिना कुलिकादियामो क
ण्टयत्यजेत् वा दोषा इति चेत्तन्न नारदवशिष्ठादिभिः पंचांगशुद्धिविरह इत्यादि पठितदोषेषु वारदोषस्याप्युपग्रहण
त् नहि कुलिकं कांतिसाम्यं चेत्याद्यागमवलात् कुलिकादियामौ त्यजेते यद्येवं तर्हि षष्ठाष्टमचंद्रेण किमपराद्ध
स्तोऽप्यागमवलात्त्यज्यते नात्र प्रमाणवचनं किमपि श्रुतमिति चेत्तदपि न यतस्त्वागमाः प्रमाणवचनानि मन्ये व
षष्ठेऽष्टमे मूर्तिगते च चंद्रे गोधूलिके मृत्युमुपैति कन्या कुजेऽष्टमे मूर्तिगते च वास्तेव रस्य नाशं प्रवदन्ति गर्गाः धि
ष्ण्यं कृत्यं युतेत्यान्मयूत्तो षष्ठाष्टमः शशी गोरजस्तत्र वर्षा मतिः संतः शनिदिने विना मूर्तौ षष्ठाष्टमे चंद्रे कुजे रंधा
स्तलग्ने गं विनारं धूमोऽर्थेक्तं गोधूलं शुभदं भवेत् इत्यादीनि एतान्यवहुमतानीति चेत्तदपि न यत्या

1387

वि०टी०। यदुक्तं सार्क मित्यादिना त्यादिमाणमाह अत्रेति अत्र गोधूलिके यत उभयत्रार्द्धास्तमयाभ्याम् कूपश्चाम्बु घटि
५६ कादलमिष्टमाकृष्टस्तस्मात् दंवरमएोः सूर्यस्यार्द्धं विंबोपि कालो न ग्राह्यः अर्द्धं विंबं यत्र सत तथा नहि तद्वाक्या
नागतिः के स्यतत्राह कालेति इयं तपनार्द्धविंबवेला व्यवस्थितिः तपनस्य यदर्द्धं विंबं तस्य वेला कालः
स्तस्य व्यवस्थितिरवस्थानं कालस्यार्गलायानियतये नियमाय मुनिभीरचयां बभूवे अरवि लिंगनो
द्ध चने: कर्म्मणि लिटि भवोक्त प्रयोगः किंतु तत्सर्वं तत्स्पष्टाम्बुत्थापि कालान्तरमस्ति अर्द्धघटिकाकालिक

अत्रोभयत्र घटिकार्द्धमिष्टमाकृष्ट्वासहसदं वरमणेरपिनार्द्धविंबः ॥ ॥

वाकान्तरदर्शनादिति भावः यत्र गोधूलिके विविधमस्तमयश्रेत्सादिना यदुक्तं ग्रंथकृतानत्सम्यग्वि।
चयपदवीं नाधिरोहति तथाहि यदुक्तोत्र हेतुः पंचांगशुद्धिमयमेव विवाहे विधेयइत्यादि तत्र पृछ्यते
केयं पंचांगशुद्धिरिति पंचांगानि तिथ्यादीनि प्रसिद्धानि नारदवशिष्ठादिभिः पंचांगशुद्धिविरहो दो
षस्त्वाद्यः प्रकीर्त्तितइत्यादिना महादोषकरग्रहणेऽभिहितानि तेषां शुद्धिर्दोषविरहः दोषो द्विधा प्राक
तिकआगंतुकश्चेति यस्मिन्कर्मणि यदनभिहितं तिथ्यादिकं तत्राद्योदोषः यथा विवाहे दर्शव्यतीपा
तभरणादौ आगंतुको ग्रहादिजनितो यथा तिथौ दग्धत्वं नक्षत्रे पापवेधादिकमिति अथ पंचांगानां दुर्गा
५६

किंच नाशाइति इह गोधूलिके शोनवांशाः स्वभर्त्रा स्वस्वामिना दृष्टा दृष्टो वा युतो वा नास्तलग्नं च स्वभर्त्रा दृष्ट
युतं नास्तु अर्कीरसोऽप्यतमसां सूर्यभौमशनिराहूणां स योयोगस्तेन भंगो लग्नभंगः सोपि नास्तु एवं स
सेकं चंद्रद्वारभयं किमन्तु अपि तु चंद्रषडष्टमादिदोषा नास्त्वित्यर्थः ननु अत्रागम एव प्रमाणमिति चेत्तत्रा
ह किंचेति अत्र चंद्रद्वारविषये वा पुरस्मात्कं प्रमाणं किमपि न श्रुतं अस्मिन्विषये यत्वाक्यं प्रमाणीकर्तव्य
तन्महर्षिसंमतं वाक्यं नास्तीति भावः तदेवत्र किं विलोक्य मित्याह सार्कमिति नक्रो धूलिकं शानो शानि वा
नाशोनलग्नमिह दृष्टयुतं स्वभर्त्रा नार्कीरसोरतमसामपि संगभंगः किंचांद्रद्वारभयमेवमिहास्ति
किंच नात्र प्रमाणवचनं किमपि श्रुतं वः ४ सार्कशानो विरविचित्रशिखंडिसूनौ तत्केवलं कुलि
कयामदलोपलंभात् प्रायेण संकरभवाम शुभमदं पलक्रूरत्वलेषु शुभकेत्कारपीडने स्यात् ५
रे सार्ककाये दृश्ये रवौ सतीति चित्रशिखंडिनः सूनौ गुरुवारे विरविकार्यं अस्तं गते के सतीति यस्मात्
कुलकयामदलोपलंभात् शनौ राजौ प्रथम महत्ते कुलकोतः सार्के गुरुवारे त्वष्टमो यामार्द्ध अत्रतो
विरवीति केवलमिदमेवं पंचांगमध्ये वारदोषसद्भावान्नत्वन्यदिति एतत्कथं तत्राह प्रायेणेति सं
करेण जातिसंकरेण भवतीति संकरभवस्तेषां हीनवर्णानां करपीडनं प्रायेण वा हल्पेनाशुभमदं प
दक्रूरत्वलेषु शुभकेत्स्यात् अशुभे नंतत्तेपले च क्रूरग्रहीयलग्नेव उपलत्रतन याद्दुष्टवार

1389

विं०टी०। ४५ यद्येवं तर्हि केचिदष्टमचंद्रे सति लग्नभंगमाहुस्तान्निरस्यति गोधूलिकेति गोधूलिके पि लग्ने
षष्ठेष्टमे च मूर्त्तौ यस्मात् विधुं यत्केचित् मोचयंति त्यजंति तन्दयं स्वरुच्चेरेव प्रपंचो विस्तारः तथा।
कं हित्वा चंद्रमसं षड्ष्टमगतं गोधूलिके शस्यते इति प्रपंचो जनमोहनं तत्र हेतुर्यस्मादिदं गो
धूलिकं विवाहधिष्ण्यैः सह पंचांगशुद्धिप्रधानमेव गोधूलिके विवाहेन तत्रे सति पंचांगशु

गोधूलिके पि विधुमष्टमषष्ठमूर्त्तिं यन्मोचयंति तदयं स्वरुचिप्रपंचः ।
पंचांगशुद्धिमयमेव विवाहधिष्ण्यैर्यस्मादिदं सततमस्तगते पतंगे ३

द्धिरेव प्रधानत्वादपेक्ष्यते न त्वन्यत् लग्नशुद्ध्यादिकमिति पंचांगानि तिथ्यादीनि तेषां शुद्धिः
स्वाभाविकदोषविरहः नत्त न तत्रस्य पंचांगान्तर्गतत्वाद्विवाहधिष्ण्यैरिति नृपोनस्तं तन्न न
तत्रस्य प्राधान्याभिप्रायात् उक्तधिष्ण्यमधिकृत्य पंचांगशुद्धिर्विलोक्येत्यर्थः एतदग्रे प्रपंचयि
ष्यामः यस्मात्कारणादिदं गोधूलिकं सततं सर्वदा पतंगे सूर्ये स्तमगे सति तस्मात् एतादृशे म
हादोषरहिते सति किंत्वन्यैष षष्ठाष्टचंद्रादयइति भावः अनेनैव वाष्टमो मादयो निराकृताः ३ ४५

अथगोधूलकप्रशंसांनदधिकारिणमाह उत्कर्णेति पंचसुवसंततिलका: उदूर्ध्वौकर्णौये
षांतेउत्कर्णाः तेतर्णकावत्सास्तेषांविलोकनंतेनवत्साव:प्रोभंनाःतेनवल्गुनोगतिविशेष
वत्य: पीनास्तनायासांताः तदुत्कर्षेणहर्षिताःसंतुष्टाः हर्षेनिर्हितायावेदूत्वंदुःखेनधर्तुंशक्यं
तेनाऽदुर्धराश्रयाधेनवस्तासांधूलिर्गोपपृथग्जनानांगोपादिपामरलोकानांहेतवेगोधूलि

उत्कर्णतर्णकविलोकनवल्गुवत्सात्पीनस्तनोद्धृषितदुर्द्धरधेनुधूलिः
गोधूलिकंसृजतिगोपपृथग्जनानांदोषैर्महद्भिरपिलग्नममंगलमन्यैः २

कंसृजति गोधूलिकलग्नंददाति गोधूल्युपलक्षितकालेभवंलग्नंगोधूलिकं तत्रलग्ने।
सदासप्तमःसूर्योभवत्येव अयंमहान्दोषः मदनमूर्त्तिशयइत्युक्तत्वात् अन्यैर्महद्भि
रपिदोषैरष्टमभौमादिभिःसहितमपिलग्नंशुभंभवेत् २ श्रीदुर्गायैनमः ॥
श्रीदुर्गायैप्रनमः॥ ॥ ॥ ॥

अथगोधूलकलग्नस्यविशेषमुद्दिश्यविवदुस्तावत्तत्कालंदर्शयन्स्वकविताकौशलमभिव्यनक्ति प्राचीमि
ति शार्दूलविक्री० अंगेदेहेलग्नाः स्पृष्टाः सुरभीणांधेनूनां रेणवोधूलयो यस्यावेष्वास्तस्याः
पाणिंगृह्णातीतिवरस्तावत्कालंभवति यावद्रविः संध्यासायंसंध्यारूपायाः कुरंगीदृक्वधूस्त
यासहकिरणसंपर्केकरग्रहंयाति किंकुर्वन् प्राचींदिशंपूर्वांप्रति तथाप्राचेतसींचदिशंप्रत्या
त्मानंदर्शयन् कीदृशींप्राचींकुंकुमेनचर्चितांमंडितामिवेत्युत्प्रेक्षा दृशेर्णिजंतत्वाद्द्विकर्मक

प्राचींकुंकुमचर्चितामिवदिशंमुक्ताफलस्रग्विणींकौसुंभांशुकभासिनीमिवदिशं
प्राचेतसींदर्शयन् यावद्यातिकरग्रहंसहरविः संध्याकुरंगीदृशातावन्मंगलमंगल

त्वं सायंप्राच्यांकुंकुमसदृशः स्वाभाविकः संध्यारागः सकुंकुमतयोत्प्रेक्षितः कथंभूतांनतत्र
मालेवमुक्ताफलानांस्रक् विद्यतेयस्यांसातां मत्वर्थेविनिः कीदृशींप्राचेतसींवारुणींकौसुंभां
शुकभासिनीं कुसुंभ्याः पुष्पाणिकुसुंभानितैरक्तंकौसुंभंतच्चतदंशुकंचतेनभासतेसा
तथा अर्थात्संध्यारागएवकौसुंभांशुकतयाकल्पितः यावत्सायंरागः सुरभीरेणवश्चदृश्यते
तावत्कालंकरग्रहकर्तुर्मंगलंस्यादितितात्पर्यार्थः १ ॥ ४४

अथ जन्ममासादिनिषेधमाह नो जन्मेति जन्मसंबंधिनि मासे तिथौ भे एषु मङ्गलं चौडोपनयनवि
वाहादिकं नाम नेति तथाधिकोने मासे तिथौ च अधिकमासे दत्तयमासे दिनक्षये दिनत्रये च न
ज्येष्ठमासे विशेषमाह ज्येष्ठगर्भजमपत्यं पुत्रः पुत्री वा ज्येष्ठे मासे महोत्सवं चूडोपनयनोद्वाहा
दिकं नृपेतं अशांतसद्वृद्धिं न इयात् लभेत ज्येष्ठापत्यस्य न ज्येष्ठे मंगलं कार्यमित्यर्थः २६

नो जन्ममासतिथिभेषु न चाधिकोने मासे तिथौ च प्रथमङ्गलनामनेति यज्ज्ये
ष्ठगर्भजमपत्यमुपेतमेतज्ज्येष्ठे महोत्सवमुखं अपमियान्न वृद्धिं २६ इत्यतीन्द्रिय
दृशो निरचिरे यदुग्रागुरुलमयं च नोऽस्वरोः देवविद्विदितजन्मतन्मतः कीर्तिभागमे

एतज्ज्ञानफलमाह इतीति गुरुलग्नमयं गुणदोषविचारणात्मकं दिव्यदृष्टयो मुनयो यन्निरूपि
तवंतः अस्य यच्छब्दस्य तन्मतः इति समासान्तर्गतयच्छब्देनान्वयो बोध्यः विदितवरवध्वोर्ज
न्मतन्मतं च येन स बलग्ने न लग्नागुणदोषविवेकाय निविष्टाधीर्यस्य स दैवविन्कीर्तिभा
ग्भवति २७ इति विवाहवृंदावनटीकायां षड्गुणाधिकाराध्यायः ॥ ७ ॥